National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(68): 151-153
© 2026 NJHSR
www.sanskritarticle.com

Satyanarayan Dwibedi
Research Scholar,
Dept. of Vyakarana ,
National Sanskrit University,
Tirupati,(A.P)

Correspondence:
Satyanarayan Dwibedi
Research Scholar,
Dept. of Vyakarana ,
National Sanskrit University,
Tirupati,(A.P)

अरण्यकाण्डीयकृदन्तपदानां पाणिनीयव्युत्पत्तिः प्रसङ्गगतार्थविश्लेषणञ्च

Satyanarayan Dwibedi

प्रस्तावना

महर्षिवाल्मीकिप्रणीतं रामायणं संस्कृतसाहित्यस्य आदिकाव्यं तथा भारतीयसंस्कृतेः अमूल्यं निधिरस्ति। अस्य महाकाव्यस्य अरण्यकाण्डे श्रीरामस्य वनवासजीवनम्, ऋषीणां संरक्षणम्, राक्षसानां वधः, सीताहरणम्, जटायोः पराक्रमः, रामस्य शोकः तथा सीतायाः अन्वेषणम् इत्यादयः घटनाः विस्तरेण वर्णिताः सन्ति। एतेषां घटनानां वर्णने विविधधातुभ्यः निष्पन्नानां कृदन्तपदानां महत्त्वपूर्णं योगदानमस्ति ।

कृदन्तपदानि धातुभिः सह कृत्प्रत्ययानां संयोगेन निष्पद्यन्ते । तेषां माध्यमेन कर्तुरवस्था, क्रियायाः सम्पन्नता, क्रियमाणत्वम्, पूर्वकालिकक्रिया, भावः तथा प्रयोजनम् इत्यादयः अर्थाः अभिव्यज्यन्ते । अतः अरण्यकाण्डे प्रयुक्तानां कृदन्तपदानां पाणिनीयव्युत्पत्तेः तथा प्रसङ्गगतार्थस्य अध्ययनं व्याकरणात्मकं साहित्यिकं च महत्त्वं धारयति । अध्ययनस्यास्य प्रमुखं प्रयोजनं कृदन्तपदानां रूपसिद्धिं, प्रत्ययविधानं, धात्वर्थं, वाक्ये तेषां कार्यं तथा कथाप्रसङ्गे तेषाम् अर्थवैशिष्ट्यं च ज्ञातव्यमस्ति ।

कृदन्तपदानां पाणिनीयस्वरूपम्

पाणिनीयव्याकरणे धातोः परे विहिताः कृत्प्रत्ययाः पदनिर्माणस्य प्रमुखं साधनमिति । तृतीयाध्यायस्य प्रथमपादे कृत्प्रत्ययविधानस्यारम्भः भवति । क्त, क्तवतु, शतृ, शानच्, क्त्वा, तुमुन्, ल्यप् इत्यादयः प्रत्ययाः विविधेषु अर्थेषु प्रयुज्यन्ते । "कृदतिङ्" (अष्टाध्यायी ३.१.९३) इति सूत्रेण कृत्प्रत्ययान्तपदानां स्वरूपं ज्ञायते । तथैव "निष्ठा" (१.१.२६) इति सूत्रेण क्त-क्तवतु-प्रत्ययोः निष्ठासंज्ञा विधीयते । "लटः शतृशानचावप्रथमासमानाधिकरणे" (३.२.१२४) इति सूत्रं वर्तमानकालिक- कर्तृवाचिनोः शतृ-शानच्प्रत्ययोः विधानस्याधारः विद्यते । एतेषां सूत्राणाम् आधारेण अरण्यकाण्डे प्राप्तानां कृदन्तपदानां स्वरूपम्, अर्थः तथा च वाक्यगतं प्रयोजनं विश्लेषयितुं शक्यते। सांप्रतं रामायणीयश्लोकानां पाणिनीयदिशा कृदन्तपदविश्लेषणमालोचयामः । यथा-

विशुद्धवंशाभिजनाग्रहस्ततेजोमदः संस्थितदोर्विषाणः ।
उदीक्षितुं रावण नेह युक्तः स संयुगे राघवगन्धहस्ती ।।[1]

प्रसङ्गः-

अस्मिन् श्लोके मारीचः रावणं श्रीरामस्य अतुलनीयबलं वर्णयन् जागरयति । श्रीरामः श्रेष्ठवंशसम्भवः, तेजस्वी, दृढबाहुश्चास्ति । अतः तेन सह युद्धं कर्तुम् इच्छया रावणः स्वविनाशमेव आमन्त्रयति ।

कृदन्तपदानां विश्लेषणम

कृदन्तपदम्	प्रकृतिः+प्रत्ययः	व्याकरणसूत्रम्
उदीक्षितुम्	उद् + ईक्ष्+तुमुन्	तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्[2]
संस्थितः	सम् + स्था+ क्त	निष्ठा[3]

विशेषविचारः

उदीक्षितुम्

उदीक्षितुम् इति पदं उद् उपसर्गपूर्वकात् ईक्ष् (दर्शने) धातोः तुमुन्-प्रत्ययेन निष्पन्नम्। पाणिनीयव्याकरणे "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्"[4] इति सूत्रेण तुमुन्-प्रत्ययस्य विधानं भवति। अत्र तुमुन्-प्रत्ययस्य प्रयोगः दर्शनक्रियायाः प्रयोजनं बोधयति । अस्य पदस्यार्थः भवति-द्रष्टुम्, अवलोकयितुम् अथवा निरीक्षितुम्। प्रस्तुतश्लोके रावणं प्रति सम्बोधनपूर्वकं कथ्यते यत् युद्धभूमौ राघवस्य दर्शनमपि तव कृते उचितं नास्ति । अत्र उदीक्षितुम् इति पदेन रामस्य प्रभावः, पराक्रमः तथा शत्रुषु तस्य भयङ्करत्वं व्यज्यते।

संस्थितः

संस्थितः इति पदं सम् उपसर्गपूर्वकात् स्था (गतिनिवृत्तौ/स्थितौ) धातोः क्त-प्रत्ययेन निष्पन्नम्। पाणिनीयव्याकरणे "निष्ठा" इति सूत्रेण क्त-क्तवतू प्रत्ययययोः निष्ठासंज्ञा भवति। क्तप्रत्ययः भूतकालिकक्रियायाः अर्थं बोधयति । अस्य पदस्यार्थः भवति-स्थितः, अवस्थितः, दृढतया प्रतिष्ठितः । प्रस्तुतश्लोके संस्थितदोर्विषाणः इति समस्तपदस्य माध्यमेन रामस्य बाहू हस्तिनः विषाणाभ्यां तुलितौ स्तः । यथा गजस्य विषाणौ तस्य बलस्य प्रतीकौ भवतः, तथैव रामस्य बाहू तस्य अद्भुतबलस्य तथा युद्धकौशलस्य प्रतीकौ स्तः। अनेन कविः रामस्य शरीरबलं, धैर्यं तथा शौर्यं गजस्य महाबलत्वेन सह उपमायां प्रकाशयति ।

कोषगतार्थः-

अमरकोशे 'ईक्ष्' धातोः अर्थः दर्शनम्, अवलोकनम् इति स्वीकृतः। ईक्षते इत्यस्य अर्थः पश्यति, निरीक्षते अथवा अवलोकयति इति भवति। 'उद्' उपसर्गस्य योगेन अस्य पदस्य अर्थे विशेषता जायते। अतः उदीक्षितुम् इत्यस्य अर्थः विशेषरूपेण द्रष्टुम् अथवा सम्यक् अवलोकयितुम् इति भवति। वाचस्पत्यम् तथा शब्दकल्पद्रुमः इत्यादिषु कोशग्रन्थेषु ईक्ष्-धातोः दर्शनार्थकत्वं प्रतिपादितम्। अतः प्रस्तुतश्लोके उदीक्षितुम् इति पदं राघवस्य पराक्रमं प्रत्यक्षं द्रष्टुम् इत्यर्थे प्रयुक्तम् । पुनश्च अमरकोशे स्था-धातोः स्थितिः, अवस्थानम् इत्यादयः अर्थाः प्रतिपादिताः। संस्थितः इति पदं सम् उपसर्गपूर्वकात् स्था-धातोः क्तप्रत्ययेन निष्पन्नम्। अस्य कोशगतः अर्थः-स्थितः, अवस्थितः, प्रतिष्ठितः, दृढतया अवस्थानं प्राप्तः इति । वाचस्पत्यम् तथा शब्दकल्पद्रुमः इत्यादिषु कोशग्रन्थेषु संस्थानम्, स्थिति, अवस्थानम् इत्यादयः अर्थाः निरूपिताः । अतः संस्थितः इत्यस्य अर्थः केवलं स्थितः इति न, अपितु दृढतया अवस्थितः इत्यपि भवति। पुनरपि श्रीमद्वाल्मीकीयरामायणे, अरण्यकाण्डे- उदीक्षितुं रावण नेह युक्तः स संयुगे राघवगन्धहस्ती । अत्र उदीक्षितुम् इत्यस्य अर्थः "द्रष्टुम्" इति। संस्थितदोर्विषाणः इति पदेन रामस्य बाहवोः दृढता हस्तिनः विषाणाभ्यां उपमितास्ति ।

पाणिनीयप्रक्रियारूपविश्लेषणम्-

अत्र **उदीक्षितुम्** एकं कृदन्तपदं वर्तते। पाणिनीयदिशा तस्य विश्लेषणमनेन प्रकारेण भवति यथा-उत्+ईक्ष्+तुमुन्। अत्र उदुपसर्गपूर्वकात् ईक्ष दर्शने इत्यस्मात् धातोः **समानकर्तृकेषु तुमुन्**[5] इत्यनेन सूत्रेण तुमुन्प्रत्यये जाते उत्+ईक्ष्+तुमुन् इति जाते अनुबन्धलोपे जश्त्वे कार्ये उदीक्षितुमिति रूपम् जायते । किञ्च बाल्मीकिरामायणस्य भूषणटीकायाम् उदीक्षितुमिति पदस्य आवीक्षितुमित्यर्थः प्रदर्शितोऽस्ति ।

सटीकार्थविश्लेषणम्-

तिलकटीकायां उदीक्षितुमित्यस्यार्थः द्रष्टुमिति। परन्तु शिवसहायस्य शिरोमणिटीकायान्तु अपराद्धुमित्यर्थे तत्पदं प्रयुक्तमस्ति। परन्तु भूषणटीकायां द्रष्टुमित्यर्थे आवीक्षितुमिति पदमुपयुज्य प्रकृतार्थं सार्थकीकरोति ।

न तेऽम्बा मध्यमा तात गर्हितव्या कदाचन।
तामेवेक्ष्वाकुनाथस्य भरतस्य कथां कुरु ॥

प्रसङ्गः-

अस्मिन् श्लोके श्रीरामः लक्ष्मणं प्रति कथयति यत्-हे लक्ष्मण ! कैकेयी तव माता अस्ति, अतः तस्याः कदापि निन्दां मा कुरु । तस्याः विषये चर्चां न कृत्वा धर्मात्मनः भरतस्य गुणानां वर्णनं कुरु ।

कृदन्तपदानां विश्लेषणम्-

कृदन्तपदम्	प्रकृतिः+प्रत्ययः	व्याकरणसूत्रम्
गर्हितव्या	गर्ह् (निन्दायाम्) + तव्यत् + टाप्	तव्यत्तव्यानीयरः[7] अजाद्यतष्टाप्[8]

विशेषविचारः

गर्हितव्या- गर्हितव्या इति पदं गर्ह्-धातोः तव्यत्-प्रत्ययेन निष्पन्नम् । तव्यत् प्रत्ययः कृत्यप्रत्ययेषु अन्तर्भवति । अस्य प्रयोगे कर्तव्यता, योग्यता अथवा अर्हता बोध्यते। गर्ह्-धातोः अर्थः निन्दा, दोषकथनम् अथवा तिरस्कारः इति । अतः गर्हितव्या इत्यस्य सामान्यः अर्थः निन्दनीया अथवा तिरस्कारार्हा इति । प्रस्तुतश्लोके गर्हितव्या इति स्त्रीलिङ्गे प्रथमा-एकवचनरूपम् । अत्र मध्यमाम्बा अर्थात् कैकेयी अभिप्रेता। श्रीरामः भरतं प्रति कथयति यत् हे तात! तव माता कैकेयी कदापि निन्दनीया नास्ति । अतः अत्र 'न' इति निषेधपदस्य योगेन मातुः निन्दा सर्वथा निषिद्धा भवति ।

कोशगतविचारः-

मोनियर-विलियम्स-संस्कृत-आङ्ग्लकोशे गर्हितव्य इत्यस्य अर्थः निन्दनीयः, दोषारोपणयोग्यः, तिरस्कारार्हः इति प्रदत्तः। वाचस्पत्ये वाचस्पतिकोशे गर्ह्-धातुः निन्दार्थकः इति निरूपितः। आप्टे-संस्कृत-आङ्ग्लकोशे गर्ह्-धातोः अर्थः निन्दा, दोषदर्शनम्, तिरस्कारः इति निर्दिष्टः। अतः कोशेषु गर्हितव्यशब्दस्य मुख्यार्थः निन्दनीयः, दोषारोपणयोग्यः, तिरस्कारार्हः इति सिद्ध्यति ।

पाणिनीयप्रक्रियारूपविश्लेषणम्-

अत्र **गर्हितव्या** एकं कृदन्तपदं वर्तते। पाणिनीयदिशा तस्य विश्लेषणमित्थं भवति यथा-गर्ह्+तव्य+टाप्। पाणिनीयधातुपाठे गर्हधातोः नैके अर्थाः सन्ति । यथा-गर्ह निन्दने , गर्ह कुत्सायाम् , गर्ह विनिन्दने। यद्यपि अनेकार्थकः गर्हधातुः तथापि प्रसङ्गानुसारमत्र गर्ह विनिन्दने इति धातोः प्रयोगः कृतः अस्ति। गर्ह विनिन्दने इत्यस्मात् धातोः **तव्यत्तव्यानीयरः** इत्यनेन सूत्रेण गर्ह्+तव्य इति जाते आर्धधातुकत्वात् **आर्धधातुकस्येड् वलादेः** इति सूत्रेण इडागमे गर्हितव्य इति जाते स्त्रीत्वविवक्षायां टाप्प्रत्यये च कृते गर्हितव्या इति रूपं सिद्ध्यति। भूषणटीकायामपि गर्हितव्या इति पदस्य निन्दा इत्यर्थः प्रकटितः।

सटीकार्थविश्लेषणम्-

तिलकटीकायां गर्हितव्येत्यस्यार्थः साक्षादेव निन्दात्वेन परिभाषितम्। किञ्च शिरोमणिटीकायान्तु गर्हितव्या नाम गर्हितं कर्म किञ्चिन्न कृतमित्यर्थे प्रयुक्तमस्ति। एवं प्रकारेण वाल्मीकि-रामायणस्यारण्यकाण्डे कृदन्तपदानां पाणिनीयव्युत्पत्तिः प्रसङ्गार्थ-विश्लेषणञ्च बहुधा गौरवमावहति ।

पादटिप्पन्यः-

[1]वा.रा.अ.का.श्लो.31.46

[2]पा.अ.सू.सं.3.3.10

[3]पा.अ.सू.सं.3.2.120

[4]पा.अ.सू.सं.3.3.10

[5]पा.अ.सू.सं.3.3.158

[6]वा.रा.अ.का.श्लो.सं.16.37

[7]पा.अ.सू.सं.3.1.96

[8]पा.अ.सू.सं.4.1.4